सप्तदशः पाठः

# रक्षत बालिकाः पाठयत बालिकाः



शिक्षिका- सुप्रभातं छात्राः!

छात्राः- सुप्रभातं महोदये!

शिक्षिका- अद्य कः दिनाड्.कः ?

बालिकाः- अद्य जनवरीमासस्य चतुर्विंशति दिनाड्.कः ।

शिक्षिका- अयं दिनाड्.कः "राष्ट्रिय बालिका दिवस"

इति रुपेण प्रतिवर्षम् आयोज्यते।

बालिकाः- राष्ट्रिय बालिका दिवसस्य कः अभिप्रायः ?कृपया बोधयतु।

शिक्षिका- श्रुणु बालिकानां संवर्द्धनार्थं भारतसर्वकारस्य महिला एवं बाल विकास मंत्रालयेन 2008 तमे वर्षे प्रतिवर्षं बालिकादिवसस्य आयोजनाय निर्णय कृतम्।

बालिकाः- महोदये! इदं राष्ट्रियबालिकादिवसस्य आयोजनं किमर्थम् ?

शिक्षिका- भारतदेशे बालिकाभ्यः समानावसरं प्रदातुं एष प्रकल्पः।

बालिकाः- महोदये! अस्माकं ग्रामेषु इदानीमपि बालिकाभ्यः शिक्षायाः समानावसरः न मिलति। अधुनापि प्रायेण अभिभावकाः स्व बालिकाः विद्यालयं न प्रेषयन्ति। किम् एतस्याः समस्या समाधानाय सर्वकारस्य काचित् योजना वर्तते ?

शिक्षिका- सुष्ठूक्तं युष्माभिः। एतदर्थं सर्वकारः अहर्निशं प्रयतमानः विद्यते। भारत सर्वकारेण एतासां समस्यानां समाधानार्थम् अनेकाः योजनाः स×चालिताः सन्ति।

बालिकाः-वयमपि ताः योजनाः ज्ञातुं समुत्सुकाः स्म।

शिक्षिका-श्रृणवन्तु बालिकानां शिक्षायै तु समस्ते राष्ट्रे भारत सर्वकारेण कस्तूरबा गांधी बालिका विद्यालयानां‘ स्थापना कृता वर्तते। यत्र षट्वर्षतः चतुर्दशवर्षपर्यन्तमस्य आयुवर्गस्य बालिकाः विद्यालस्य परिसरे पठन्ति निवसन्ति च। अपि च याः बालिकाः केनचित् कारणेन पूर्वमेव अध्ययनात् विरताः तासाम् अपि प्रवेशः अस्मिन् विद्यालये भवति।

रचना- महोदये! बालिकानां आर्थिकसहयोगाय काऽपि योजना अस्ति वा ?

शिक्षिका- आम् वस्तुतः बालिकाः आर्थिकरूपेण सबला स्युः इति उद्दिश्यं ’सुकन्यासमृद्धि योजना’ चलति स्म। अस्यां योजनायां बालिकानां शिक्षा-विवाहादिकृते तासां धनराशिसंचयनप्रोत्साहनस्य व्यवस्था अस्ति।

छात्राः-महोदये! एतदतिरिक्तं बालिकाशिशूनाम् कृते कापि योजना प्रचलिता अस्ति ?

शिक्षिका-अस्त्येव। बालिकायाः स्वास्थ्यं सुरक्षां च अभिलक्ष्य ’एकाधनलक्ष्मी योजना’अपि प्रचलिता। अस्यां योजनायां यदा कश्चिद् बालिकाशिशः ु जायते तदा तस्य परिवारः एकेन निश्चितेन धनराशिना योज्यते।

छात्राः-आम् महोदये! भारतसर्वकारेण बालिकानां विकासाय याः योजनाः संचालितास्ताः विज्ञाय वयं प्रमुदिता स्म।

## शब्दार्थः

**चतुर्विंशति-** चैबीस। **संवर्द्धनार्थं** -संवर्द्धन के लिए। **भारतसर्वकारस्य-** भारत सरकार की। **न प्राप्यते-**नहीं मिलता है। **न प्रेष्यन्ति-**नहीं भेजते हैं। **षड्वर्षतः चतुर्दशवर्षपर्यन्तस्य-** छह वर्ष से चैदह वर्ष तक की। **जायते-**उत्पन्न होती है।

1. **उच्चारणं कुरुत पुस्तिकायां च लिखत -**

संवर्द्धनार्थम् चतुर्विंशति भारतसर्वकारस्य

सुष्टूक्तम्  अहर्निशं  श्रृणवन्तु

2. **अधोलिखित पदानां सन्धि-विच्छेदं कुरुत-**

पत्रालयः- ......... +.................

समानावसरः- .........+...... .......

पूर्वमेव- .................+................

समानाधिकारः- ..........+...............

3. **मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत-**

**<u>धनलक्ष्मी योजना</u>’, <u>सबला स्युः</u>, <u>बालिकाभ्यः</u>**

(क) अस्माकम् ग्रामेषु इदानीमपि.........................शिक्षायाः समानावसरः न प्राप्यते।

(ख) बालिकायाः स्वास्थ्यं सुरक्षां च अभिलक्ष्य ’एका ............अपि प्रचलिता।

(ग) बालिकाः आर्थिकरूपेण ................इति उद्दिश्यं 'सुकन्यासमृद्धि योजना' चलति स्म।

**4. पूर्णवाक्येन उत्तरत-**

(क) धनलक्ष्मी योजनायाः के के लाभाः सन्ति ?

(ख) राष्ट्रिय बालिका दिवसः कदा आयोज्यते ?

(ग) कस्तूरबा गांधी बालिका विद्यालयानां स्थापनाय किं प्रयोजनम् ?

**5. संस्कृत भाषायाम् अनुवादं कुरूत-**

(क) बालिका शिक्षा के संवर्द्धन हेतु अनेक योजनाएँ है।

(ख) बेटा और बेट ीको समान अधिकार मिलने चाहिए।

(ग) बालिका शिक्षा का सामाजिक विकास में बहुत महत्वपूर्ण स्थान है।

(घ) 24 जनवरी को राष्ट्रीय बालिका दिवस मनाया जाता है।

**6. मेलनं कुरूत-**

यथा- **सुकन्या समृद्धि योजना** शिशुबालिकाजन्मसंबद्धा

**कस्तूरबागांधीबालिकाविद्यालय:** जनवरीमासस्य चतुर्विंशति दिनांड ्कः

**धनलक्ष्मीयोजना** धनसंचय योजना

**राष्ट्रिय बालिका दिवसः** आवासीय विद्यालयः

**7. एकपदेन उत्तरत-**

अन्तर्राष्ट्रिय बालिका दिवसः-

अन्तर्राष्ट्रिय महिला दिवसः-

राष्ट्रिय बालिका दिवसः-

**एतदपि जानीत-**

**<u>महिला सहायता दूरभाष संख्या-1090</u>**